श्रीसदाशिवायनमः
मुकुलापनामरामचंद्रस्येदं॥

अथप्रशस्तिवादोपंडितब्राह्मणस्य। स्वस्तिश्रीमत्समस्तप्रशस्तिप्रशस्त
यशःसोमसोमप्रकाशप्रकाशितब्रह्मांडमंडपपुविशिष्टशिष्टाचारचातुरी
तिरस्कृतशिष्टपुरस्कृतवसिष्ठादिशिष्टाचारेषुसौजन्यसिंधुषुनिरु
पाधिबंधुषुसकलगुणगणग्रामाभिरामगुणिगणविश्रामाचिभुवनवि
ख्यातनामहृदयनिहितरामपातकविरामदूरितयाचककामप्रकाशित
शास्त्रपरिणामवाग्देवतारामकृतपरार्थव्यायामपु॥श्रीमन्निखिला
वनिमंडलमंडनाविद्वज्जनमंडलीविराजमानकीर्तितरंगिणीक्षालि
ताशेषदिगंतन्यायनीरधिमथनमंदरकरतलामलकीकृतचिदा
नंदाद्वैतसांगमीमांसानुष्ठानलब्धिष्टीकृतवसिष्ठपु॥श्रीमज्ज
गदीश्वरचरणनलिनपरायणांतःकरणषट्चरणेषुशास्त्रचतु

श्री ॥१॥

श्री ॥१॥

रयश्रृंगाटकचंचारचतुरमतिप्रक्षायेषुमहाराजधुरंधरवंदनीयचरणांभो
जेषुश्रीमदमंदसच्छिष्याज्ञानतिमिरनिकृंतनविकर्तनायमानविद्वन्मंडली
मानसराजहंसायमानदानदयादाक्षिण्यादिगुणगणरत्नरत्नाकरहर
चरणकमलमकरंदमत्तमधुकरीकृतनिजांतःकरणनिजमुखचंद्रनिःस्य
ताननवद्यपद्यगद्यविद्यानवद्यामृतसंजीवितानखिलमहीपालचित्तचकोरे
षुश्रीमदखिलक्षितितलतिलकसार्वभौममहीमंडलरामराजसदःसरो
राजहंसमनःसमुल्लासजननिपुणगुणगणमुक्ताफलोपयःपारावा
रेषुसकलविद्वत्कुलैकमनीयमनीषासमुल्लसीसाहितातिप्रच्छन्नार्थतत्त्व
चमत्कारपात्रीकृतचेतःशतपत्रेषुसुहृदयाज्ञानोदयनारनिधिचंद्रेषु
यायमानसुखोदयेषुसकलविद्वद्वंदनीयेषु॥श्रीमन्निखिलानवद्यायो

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

यविघोतमानेषु निःकपटमेव्यराराधनसंजातसाक्षात्तिरस्कृताशेष
महेषु विबुधवृंदवृंदारकवृंदवंदनीयपादारविंदेषु पदवाक्यप्रमाणपा
रावारीणधुरीणेषु अगणितपुण्यपवित्रचरणेषु विनयमित्रेषु दुर्नि
वारेषु दात्रेषु अष्टादशविद्यानामेकपात्रेषु शिवचरणभजनप्राप्त
सकलवैभवेषु सौजन्याकूपारेषु ॥ श्रीमदनवद्यपद्यगद्यालंकृ
श्री ति सत्कृतिसत्कृताकृतकसुकृतविसरसारसारस्वतस्वतःप्रसार श्री
२ रुचिरमननसारमानसेषु मानसे शिवमनुष्यधर्मसरसायाराजहंस २
प्रियरूपेषु रूपे शिवनयनैकविलोकनीयपदेषु विलोकनीयपदे शिव
सदर्थतीर्थेषु तीर्थे शिवोपजननिरर्थीकरणसरसेषु सरसे शिवसद्भा
वप्रधानेषु प्रधाने शिवविहितपुरुषकल्पेषु कल्पे शिवविनीतजन

शि
विधेयेषु विधेये शिवमनोपितानुरूपफलाधिगमारामेषु रामे शिवनिहितप्रतिष्ठादिरव
रहपणगणेषु श्रीमदरविगणितामलगुणगणेदिरमणचरणपरिचरणजा
ष्युपपत्तिलक्षणीकृतमुमिकश्चोवसायेषु यशःपूरपरितारितत्रिदिवचक्रवा
लेषु ॥ ॥ अथावहत्प्रसोत्स्वस्ति श्रीमदनवद्यविद्याविद्योतमानप्राहरा
जमानसजनमानसहंसेषु निरंतरदानसंतानतिरस्कृतापायसंतानेषु
मधुरतरंगत्वंगिमगंगास्रोतसगतुंडिलगद्यपद्यानवद्यहृद्यभारतीसंभावना
सिन्नवदनारविंदेषु स्वरूपेशोपानिरूपितकामरूपेषु पितप्रतिमरागरंजित
वचनानुरंजितप्रजाप्रजायमानपरमोदनंदसंदोहदोहदोहदोपात्तमहोदारफ
लेषु देवदेवदर्शनपरामर्शनन्यासपर्यायग्रामदानावदानतुष्टशिष्टशिष्टाचा
रानुरूपश्रोतस्मार्तकर्मनिर्माणनिर्मितशर्मसु ॥ श्रीमन्मंगलमंडलसैवल
नालंबनकमलासनपुरंदरप्रवरसुरासुरमुनिमनुजवृंदवंदितपदारवि

दस्यभजनपरमानसाभिमतपरिपूरणवाकलिलविविधावतारगोपाल
चूडामणिसच्चिदानंदमूर्त्तिपरमाप्तचरणसरोजसंततोपासनपरिप्राप्त
निखिलसिद्धिषु ॥ धर्म्याचारप्रवर्त्तनाचार्यधुरंधरेषु प्रबलकलिका
लसहायपुरुषधर्मप्राबल्यसंजातस्वाभिमतपरापरवसंजातानेदसंदोहन
श्रीः याधर्मैकाहरक्षःप्रतन्यमानानानाशीर्वादास्पदेषु ॥ गुणिजनदलहरीनिदान
साहित्यसुधारसतरंगिणीमूलस्थानेषु दानापेक्षितनीहरणसंशोषितय श्रीः
थास्थितपारावारस्थलांतरप्रवर्त्तिताकूपारेषु करुणाऽराऽवरुणालयेषु ॥ ॥
तापमात्रकिंकरीकृतारिप्रचंडावनिपालिकटरेषु दूरावनतमहामहीपालिकी
टीरहीरप्रभ स्मरकरनिकरकिर्मीरितचरणनखचंद्रिकामयूखवत्र
करेषु मद्बुध्यामदेकानिजाश्रयेषु समस्तशीराशासनसहस्रमजस्त्रं ॥ ॥ अथ प्रधानस्य ॥ ॥ स्वस्तिश्रीमत्समस्तसामंतसेवा

निर्वाहकेषु कोशकृषिकृषीवलगजवाजिपरिवर्हर्षहेतुनीतिसेतुरक्षणनिपु
णेषु अस्माभिरभ्यासपात्रीकृतयारिक्रीकृतयुगेषु युक्तमाशीःसहस्रमजस्रमासां ॥
॥ अथ विदुषः ॥ ॥ परोपकारसत्कारनिपुणेषु वेदांतेषु विवऽशाशासनऽपुराणेदप्रक
राकेषु पातंजलेषु विवशीकृतसांख्यसोमेषु सांख्यागमेषु विवप्रकृतिमधुरेषु अर्थवा
देषु विवरचार्थपरिहारणपरार्थकपुरायणेषु न्यायकेषु विवप्रकटितसकलप्रमाण
षु वैयाकरणेषु विवसाधितानेकप्रयोगेषु विवकलाविवरेषु विवरसीकृतरसालंका
रगुणधनितावकाव्यकौतुकविचारसंचारितर्कतरंगेषु तापसेषु विवस्फुरत्पद
क्रमेषु परमाशीःसहस्रमजस्रं ॥ ॥ अथात्मनिष्ठेषु स्वस्तिश्रीमदुदारचित्त
चिंतामणिविजितजैगीषव्योक्तियुक्तवाक्यप्रकटितपातंजलप्रांजलसमाधि
विधानतत्त्वसमाजयोपयुक्तपराजितागमजयजनितसार्वभौमसंभावित
प्रांतक्षमि-चतुष्टयविस्पष्टधर्ममेधसमाधिसिद्धिविध्वस्तसमस्तक्लेशक

मविपाकविरतिनिति शयानंदसंदोहदोहदांतःकरणप्राप्तनिर्बीजसमाधिव्यक्तीकृत
प्रकृतिपुरुषविवेकख्यातिजनितवैराग्यलब्धकैवल्येषु विहृदयविहितवेदांता
र्थसमर्थनापरार्थेषु अस्मदेकाश्रयेषु पूज्यतमेषु ॥ श्रीमदनंतगुणविसरसार
सेंदिरापतिपद्मचंपरिचरणजाध्युपपत्तिलक्षणीकृतामुष्मिकश्चावसीयेषु वयो
वसत्रौत्पवसानसादरकाळदृशमनलब्धवर्षाविश्वेशसाक्षात्कारापसार्दि
श्री रितशमनदुतदरेषु विविधक्ष्मालेखपरिषत्पर्युपास्यमानपदपंकजेषु देवद
तेषु यस्तदनस्यप्रणतिसहस्रमुजस्त्रं ॥ ॥ अथसामान्यप्रशस्तिः ॥ स्वस्ति श्रीः
श्रीमत्समूलगुणामोक्तिकहारियेशोहारामिनवमंडनमंडितदिगंगनाद
नाशीर्निचयसमवाप्तसकलमनःप्रकल्पितकल्पपादपपरिताखिलव
नीपकदुःखैपरमनावटेषु वटेषिवानिखिलसंतापनिदाघार्कसंतप्त
शांतिप्रदछायाशांतस्वरूपेषु रूपेषिवनमनेकविलोकनीयेषुनि

जभुजयुगलबद्धप्रस्तबद्धप्रतापानलपरिस्त्रिनणनीराजितौग्रौजस्विवदन
पद्मेषु सर्वजनवर्तिपरानंदपरब्रह्मपरासिधानिखिलोपनिषद्रसायननंदन
दनासिधपरस्वरूपानुसंधानंदसंपृक्तमानसेषु मानसेषुधिवप्रमोदितराजहंसे
षु हंसेषिवमानससरःसरसेषु सरसेषिव सद्भावप्रधानेषु प्रधानेषिवाचे
हितपुरुषकृत्येषु कृत्येषिवसदसदलभ्यसाध्येषु सुरसर्वनिर्वाहनि
र्वापितारवर्वगर्वेसुपर्वतर्वाहितगुर्वीधिषुराजमानराजमान ४ कृतव्य ४ रा
जमानेषु श्रीमन्नाहाहारविहितोपकारकरुणासारसकलदीनोद्धारकरु
णासारकृतावतारविविधविद्यासारसगवदाराधनव्यापारप्रज्ञापा
रावारकलितसदाचारदृढव्रतवशीकृतारिपारावारसकलगुणनि
धानअखिलजनविहितविपक्षावसानप्रस्तुतयशोगानसततव
र्धमानप्रतापतपनमानजगदसमानेषु ॥ स्वस्तिश्रीमदमंदमेदुरमे

दाकिनीमधुरधारानिरंतरसीकरसंसिक्तमंदारकुसुमनिष्यंदितमकरंद
बिंदुसंदोहसहृदयहृदयशायितरोषुशायिचरणस्मरणरसिकेषु निज
नैचरितचमत्कारस्मरणविस्मारितोशीनरशिखिदधीचिकर्णगुणाव
र्णनेषु अनेककलाप्रकाशकलेनाव्यर्थीकृतराजराजेषु प्रतिभटकटक
श्रीविजयमात्रावसरजेत्रभुजभुजंगगजकायमानप्रकाकुष्ठकोदंडब्रह्मसादि
तारकोडतोडखंडितावसिखंडखंडलगर्वितारातिमंडलनिर्भिन्नचंडकरमंड
लेषु चतुरुदधिमहीमंडलाहवनीयकुंडप्रचंडप्रचंडप्रतापज्वलनहव्यमानम
हासिजुह्वासादिबकरिमुंडखंडपुरोडाशप्रस्तरधरणीमंडलोद्भाप्रेडाक्षाग
रासिजुह्वासादिबकरिमुंडखंडपुरोडाशप्रस्तरधरणीमंडलोद्भाप्रेडाक्षाग
यज्ञेमहायज्ञाहूतभूतभैरवक्रताशीराशंसनसमुद्भूतमहाभ्युदयेषु मन्त्र
मातंगतरलतरतुरंगरिंगणरसिकरणधीरवीरकरकीर्यमाणकर्णि
नालीकनाराचछेदितारातिगलगलदसृक्पानकपानक्षीबयक्षराक्ष
सविक्षोभितक्षितिधरकुक्षिसिंधुसमुच्छलत्तुंगतरंगतुंदिलकल्लोलाकलितब्रह्मांड
मंडपाकांडकदर्थ्यतब्रह्मादिदेवकल्पांतचमाविहितभूतपतितांडवाडंबरविडंबि
मृतमडानीविष्टिषु निजभुजभुजंगराजस्थापितस्थावरजंगमममहाराष्ट्रसौराष्ट्र
काशिकोशलकलिंगकर्णाटकामरूपान्ध्रपनिषधमरुमालवगौडांगवंगोत्तिषदे
हहैहयपांड्यपांचालकुरुकेरलकिरातकांभरखंडेषु ॥ ॥ अथपुत्रस्यपितरंप्रति ॥
स्वस्तिश्रीमदखिलनवविभववैशेषदचित्तचिंतितस्वीयानुरागानुरंजितानुग्रहा
तस्वगरघवर्गेषु निजचरणसरोजरेणुजितपरागास्मदादिक्षालनस्थलविशाल
भाग्यसंस्थावकेषु हरिहरहिरण्यगर्भहरबगुरुगौरवेषु पितृचरणेषु अकिंचित्कर
किंकरस्वस्यममबहुकरसंपुटप्रणतिततिः ॥ ॥ अथमातायोयामातरंप्रति ॥ स्वस्ति
श्रीमदुद्दामप्रेमहेमभ्रूपितास्मदादिक्षत्रजनेषु प्राणप्रतिकृतिषु नेत्रयोरधि
ष्ठानेषु कर्णयोरधिदेवतेषु शिरामागारेषु चित्तस्यहृदयकमलेषु बुद्धेः सत्वेषु

अहंकारस्य महत्तत्वेषु कामस्य परिणामेषु सौभाग्यस्य सौभाग्येषु ममापरूपेषु स्वा
मिचरणेषु गोविंदस्य इंदिरायाः शंकरस्य गौरिजायाम हेंद्रस्य पुलोमजायां माधवस्य
राधायाः प्रतिदिनं वर्धमानासमाराधनाप्रेमभाजं सर्वमास्तां ॥ ॥ अथ सर्वप्रभुसाधारण
प्रशस्तिः ॥ स्वस्ति श्रीदेवदेवस्मरणवशमशस्तांतसद्यसमुद्यत्प्रद्योतोद्योतिता
शाक्षमकसमुदयहस्तुक्तिसारत्रितो ॥ क्षुभ्यत्क्षीराब्धिवीचीनिचयपरिचितस्व
र्गंगागिरीशस्फूर्जद्भोगीद्रचंद्रद्रुहिणरविखगप्रेरितांविंदुकीर्तौ ॥ रामेक्ष्वा
कुनागीरथसुरथगयालर्कखट्वांगवैन्यानर्तश्रीकार्तवीर्यार्जुनजनकरघू
तंससम्यक्प्रशंसे ॥ प्रत्यग्रोद्दामदानोर्कदेशमितजगद्दीनदैन्यानलेस्मि
न्नाम्यद्भूपालमौलिस्रग्वलदमलमणिश्रेणिनीराजितांघ्रौ ॥२॥ निरुपधिप
रोपकारसत्कारेसांप्रतविदुषां ॥ भूपानामधिकारे धिक्कुकभाग्योदयोद्दामे ॥ ३ ॥

श्रीः ६

श्रीः ६

डैः कलिताशीः शतमस्तुतेन बद्धं ॥४॥ अस्माकं कुशलं सदा करुणया कल्लोलिनीक
ल्पया सर्वेषु प्रियवस्तुषु प्रतिदिनं भावत्कमाशास्महे ॥ शश्वच्छ्रेयधूकटाक्षकलन
नालेनापि संभाविता लिप्सा मे विधिना विधेयमधुना धातुर्न जानीमहे ॥५॥ क्वचि
द्दृष्टं न क्वचिद्विपरीततया योजनीयं ॥ ॥ अथ हिंदुतुरुष्कसाधारणप्रचक्रवर्त्तिप्रश
स्तिः ॥ जयति यजयजितप्रशस्तिप्रशस्तिप्रस्तुतप्रतापाप्तिभूतारिभूपालनाम्यत्स्रव
लन्मौलिमल्लीसमुद्धृतमालोल्लसत्सौरभप्रोद्धतैलूसङ्गमत्तांगनामेजुगुंजारवोज्जृं
भमदंघ्रिद्वयांभोजकुंचन्नखप्रेरवदंशुच्छटाकेसरासंगरक्तासनाभिरभ्रा
जदभ्यर्णकर्णाटलाटोत्कलद्राविडाभीरगांभीरधाम्नूरतैलंगकौलिंगकाश्मी
रकाशीकुरुक्षेत्रपांचालपंचनदजंबूगयावंगगौडांगधौवत्रिगर्त्तोत्तमानन्तभा
राधराषाडपाडापलाशिमैनाकाः ॥ कलिकलुषितनिर्धर्मकारजनमप्रजोध्धारधर्मप्र
योगैर्यवद्भावतारप्रसर्पद्यशस्तोमसोमप्रकाशैर्निःकाशितारिकीर्त्तिरवु

रासानरूवधारकूसासिंधीयदस्तानमक्कामुलतानिवलकासकाराबुखाराकिरंगा
तमावतेहेराककाबिल्लमक्कामगारयगगरखंडमुंडहेबुबरवसारुमसामसहाचीनची
नाःपरेमेरुपादाधिवासाःत्रिपादेकपादारुपास्याभृगास्यास्तथामासीशस्तक
सहरिकाशाकालागुराजंबिकोत्तुंगमातंगचंचत्तरंगोत्तसश्येनहस्ताविहस्ताःस
मस्ताःप्रशस्ताःप्रशस्तिवंदतोनिरस्ताभवंति।।भवतिसवति चंद्रचंचत्करासं
गिसरित्तरंगोछलत्तुंगदुग्धोदधिक्षतस्वचित्तानिवित्तानिवित्ताधिपाधिक्यसंपत्क
राणिक्षितौसर्वदुःखानिसौख्यानिमुख्यानिसंख्यावतानोन्नकश्चिल्लहेवानदे
शोदरिद्रस्यदारिद्र्यभिद्दादरिद्राविगर्वःसगर्वःकुवेष्टाःप्रविष्टाविशिष्टाःकनिष्ठा
निपापानिपुनानिनीतानिनिष्कामनांसिप्रजारंजनादेवमाजानुबाहास्वष्टादानैरदा
नावदानैकतानोन्नतस्वांतपीयूषधाराप्तिपीतोल्लसद्भिक्षुलक्षोत्क्षिप्तगंगात
रंगोदयद्धपद्माभिकस्तोत्रविस्तारितानेकगाथाप्रीयादितत्तद्गुणग्रामकिर्मीरि
तायारसप्तार्णवाप्रणेकीर्तेजगद्वंद्यमूर्तेतवनिपतितियत्रदृष्टिः।।सुधावृष्टिरु

श्री

श्री

द्यत्सरोजायमानानितत्रैवकेषांनशीर्षाणिनम्राणिकंप्राणिपालिद्वयोत्स्पष्टम
ष्टाक्षपादोरुलक्षमुद्रासहस्रैसहस्रावधिक्षीणपिक्षूपयुक्तंदिवानक्तमुक्तं
ठयुक्तंविविक्तंप्रयुक्तंपरित्यक्तमेकांततःस्वांतचिंताडुरंताधिनारब्धमर्धंतम
स्तोमसुस्तार्यसोत्साहमेके।एतद्दंडमिदीवरोद्दामभानंदकंदमंदासंगगंगा
वगाहाप्तिरामाभवतःकृतार्थाःसमर्थाःपुमर्थान्विसृजंतेप्रजाराज्यमायुःप्रता
पप्रभुत्वंयशःकार्यमार्यैसदोदार्यगांभीर्यधैर्यायपूजाप्रजाहृजनीयाहृजाम
स्तुनाशोमहाराजराजीवफुल्लाटल्लासमायानतिश्रीभवत्वेषमंत्रेपदांभोजपीठे
कृपावारांनिधेधेह्यनुग्रांस्वसेवार्थमात्मायंमारत्वत्वत्पथाकार्यविश्राजने
स्यामविज्ञप्तिरापत्समाप्तिःसदाव्याप्तिरेषागृहीतायहेणप्रसीदस्मिजानेत्व
दन्या।।।।अथसन्यासिनः।।स्वस्तिश्रीमत्परमहंसपरिव्राजकाचार्यसकल
कार्यकरणनिपुणलापराङ्मुखवैराग्ययोग्यपरानंदसंदोहवशंवदवशी
कारसंजनेराग्यभोग्यकेवल्येषुविषमविषयदोषदर्शनिदूषिताःप्रपंच

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रचनाचुलुकीकरणकुंभसंभवेषु वेदवेदांतसिद्धांतबद्धादरनातितिरस्कृतासंभा
वनाविपरीतवासनाप्राग्रहस्यलवस्यसमस्यसंयमसमाधिसिद्धिसमुत्पन्न
मधुमतीमधुप्रतीकाविशोकासंस्कारशेषाख्यप्रांतपरमिचतुष्टयप्रत्याख्या
नाख्यातसाख्यागमप्रकृतिपुरुषविवेकख्यातिनिष्णातसंख्यावन्मुख्यवि
दितपादारविंदेषु महावाक्योपदेशरेशिकसन्यासाश्रमयथोक्तपरिपालनपावि
त्रीकृतधारत्रीतलेषु देवनदेवपूजितेषु श्रीपादेषु प्रपंचविस्मरण
पूर्वकं नारायणस्मरणपूर्वकं प्रणामसहस्रमजस्रमिति ॥ ॥ वेदार्थोपनिष
द्विद्वच्चारविमलस्वांतसरोवोल्लसन्नवज्ञानसमुल्लसन्मतिमतामार्येषु पुण्या
भसु। विद्वन्मंडलपुंडरीकपरिषत्प्रोद्यत्सुधाधामसु स्फूर्जत्काव्यकलाकुतूहल
मिलद्भूमीपतिप्रेमसु ॥१॥ इति श्रीविद्वन्मंडनचंद्रकुंडभट्टकृता प्रशस्तिः समाप्ता ॥
दंतीहूपमितेशाके विद्वत्तावाब्धिनेभुसे ॥ रवौ नागतिथावेतां प्रशस्तिमलिखत्सु
धीः ॥ ॥ ॥ बानोंबपजमिगिपं ॥ ॥ ॥ छ ॥ ॥ ॥ ॥ छ ॥ श्री